# श्री श्रीनिवास विद्य

## श्री श्रीनिवास विद्य

### शुक्लपक्षं (पाड्यमि नुंडि पौर्णमि वरकु)

ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजां
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो मआवह

सहस्र’शीर्-षा पुरु’षः | सहस्राक्षः सहस्र’पात् |
स भूमिं’ विश्वतो’ वृत्वा | अत्य’तिष्ठद्दशांगुलं ‖ 1 ‖

तां म आवह जातवेदो लक्ष्मी मनपगामिनीं
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं

पुरुष एवेदग्-म् सर्वं” | यद्भूतं यच्च भव्यं |
उतामृ’तत्व स्येशा’नः | यदन्ने’नातिरोह’ति ‖ 2 ‖

अश्वपूर्वां रथमध्यां हस्तिना द प्रबोधिनीं
श्रियं देवी मुपह्वये श्रीर्मा देवीर्जुषतां

एतावा’नस्य महिमा | अतो ज्यायाग्’श्च पूरु’षः |
पादो”ऽस्य विश्वा’ भूतानि’ | त्रिपाद’स्यामृतं’ दिवि ‖ 3 ‖

कांसोस्मितां हिरण्य प्राकारा मार्दां ज्वलंतीं तृप्तां तर्पयंतीं
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं

त्रिपादूर्ध्व उदैत्पुरु’षः | पादो”ऽस्येहाऽऽभ’वात्पुनः’ |
ततो विष्वङ्व्य’क्रामत् | साशनानशने अभि ‖ 4 ‖

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां
तां पद्मिनीमीं शरणमहां प्रपद्ये लक्ष्मीर्मे नश्यतां त्वां वृणे

तस्मा”द्विराड’जायत | विराजो अधि पूरु’षः |
स जातो अत्य’रिच्यत | पश्चाद्-भूमिमथो’ पुरः ‖ 5 ‖

आदित्यवर्णे तपसो धिजातो वनस्पतिस्तव वृक्षोथ बिल्व:
तस्य फलानि तपसानुदंतु मायांतरायाश्च बाह्या अलक्ष्मी:

यत्पुरु’षेण हविषा” | देवा यज्ञमत’न्वत |
वसंतो अ’स्यासीदाज्यं” | ग्रीष्म इध्मश्शरध्धविः ॥ 6 ॥

उपेतु मां देवसख: कीर्तिश्च मणिना सहा
प्रादुर्भूतो स्मिराष्ट्रे स्मिन् कीर्तिमृद्धिं ददादुमे

सप्तास्या’सन्-परिधयः’ | त्रिः सप्त समिधः’ कृताः |
देवा यद्यज्ञं त’न्वानाः | अब’ध्नन्-पुरु’षं पशुं ॥ 7 ॥

क्षुत्पिपासामलां ज्येष्ठा मलक्षीं नाशयाम्यहं
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्

तं यज्ञं बर्हिषि प्रौक्षन्’ | पुरु’षं जातम’ग्रतः |
तेन’ देवा अय’जंत | साध्या ऋष’यश्च ये ॥ 8 ॥

गंदद्वारां दुरादर्षां नित्यपुष्टां करीषिणीं
ईश्वरीग्म् सर्व भूतानां तामिहोपह्वये श्रियं

तस्मा”द्यज्ञात्स’र्वहुतः’ | संभृ’तं पृषदाज्यं |
पशून्-स्ताग्-श्च’क्रे वायव्यान्’ | आरण्यान्-ग्राम्याश्च ये ॥ 9 ॥

मनस: कामकूतिं वाच: सत्यमशीमहि
पशूनां रूपमन्यस्य मयि श्री:श्रयतां यश:

तस्मा”द्यज्ञात्स’र्वहुतः’ | ऋचः सामा’नि जज्ञिरे |
छंदाग्’सि जज्ञिरे तस्मा”त् | यजुस्तस्मा’दजायत ॥ 10 ॥

कर्दमेन प्रजाभूता मयि संभव कर्दम
श्रियं वासय मे कुले मातरं पद्ममालिनीं

तस्मादश्वा’ अजायंत | ये के चो’भयाद’तः |
गावो’ ह जज्ञिरे तस्मा”त् | तस्मा”ज्जाता अ’जावयः’ ॥ 11 ॥

आप: सृजंतु स्निग्दानि चिक्लीत वसमे गृहे
नि च देवीं मातरं श्रियं वासयमे कुले

यत्पुरु’षं व्य’दधुः | कतिथा व्य’कल्पयन् |
मुखं किम’स्य कौ बाहू | कावूरू पादा’वुच्येते ॥ 12 ॥

आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह

ब्राह्मणो”ऽस्य मुख’मासीत् | बाहू रा’जन्यः’ कृतः |
ऊरू तद’स्य यद्वैश्यः’ | पद्भ्यागं् शूद्रो अ’जायतः ॥ 13 ॥

आर्द्रां य: करिणीं यष्टिं सुवर्णां हेम मालिनीं
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह

चंद्रमा मन’सो जातः | चक्षोः सूर्यो’ अजायत |
मुखादिंद्र’श्चाग्निश्च’ | प्राणाद्वायुर’जायत ॥ 14 ॥

तां म आवह जातवेदो लक्ष्मीमन पगामिनीं
यस्यां हिरण्यं प्रभूतं गावो दास्यो श्वान्, विंदेयं पुरुषानहं

नाभ्या’ आसीदंतरि’क्षं | शीर्ष्णो द्यौः सम’वर्तत |
पद्भ्यां भूमिर्दिशः श्रोत्रा”त् | तथा’ लोकाग्-म् अ’कल्पयन् ॥ 15 ॥

## कृष्ण पक्षं (पाड्यमि नुंडि अमावास्य वरकु)

सहस्र’शीर्-षा पुरु’षः | सहस्राक्षः सहस्र’पात् |
स भूमिं’ विश्वतो’ वृत्वा | अत्य’तिष्ठद्दशांगुलं

ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजां
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो मआवह ॥ 1 ॥

पुरुष एवेदग्-म् सर्वं” | यद्भूतं यच्च भव्यं |
उतामृ’तत्व स्येशा’नः | यदन्ने’नातिरोह’ति

तां म आवह जातवेदो लक्ष्मी मनपगामिनीं
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं ॥ 2 ॥

एतावा’नस्य महिमा | अतो ज्यायाग्’श्च पूरु’षः |
पादो”ऽस्य विश्वा’ भूतानि’ | त्रिपाद’स्यामृतं’ दिवि

अश्वपूर्वां रथमध्यां हस्तिना द प्रबोधिनीं
श्रियं देवी मुपह्वये श्रीर्मा देवीर्जुषतां ॥ 3 ॥

त्रिपादूर्ध्व उदैत्पुरु’षः | पादो”ऽस्येहाऽऽभ’वात्पुनः’ |
ततो विष्वङ्व्य’क्रामत् | साशनानशने अभि

कांसोस्मितां हिरण्य प्राकारा मार्दां ज्वलंतीं तृप्तां तर्पयंतीं
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं ॥ 4 ॥

तस्मा”द्विराड’जायत | विराजो अधि पूरु’षः |
स जातो अत्य’रिच्यत | पश्चाद्-भूमिमथो’ पुरः

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां
तां पद्मिनीमीं शरणमहां प्रपद्ये लक्ष्मीर्मे नश्यतां त्वां वृणे ॥ 5 ॥

यत्पुरु’षेण हविषा” | देवा यज्ञमत’न्वत |
वसंतो अ’स्यासीदाज्यं” | ग्रीष्म इध्मश्शरध्धविः

आदित्यवर्णे तपसो धिजातो वनस्पतिस्तव वृक्षोथ बिल्व:
तस्य फलानि तपसानुदंतु मायांतरायाश्च बाह्या अलक्ष्मी: ॥ 6 ॥

सप्तास्या’सन्-परिधयः’ | त्रिः सप्त समिधः’ कृताः |
देवा यद्यज्ञं त’न्वानाः | अब’ध्नन्-पुरु’षं पशुं

उपॅतु मां देवसख: कीर्तिश्च मणिना सहा
प्रादुर्भूतो स्मिराष्ट्रे स्मिन् कीर्तिमृद्धिं ददादुमे ॥ 7 ॥

तं यज्ञं बर्हिषि प्रौक्षन्’ | पुरु’षं जातम’ग्रतः |
तेन’ देवा अय’जंत | साध्या ऋष’यश्च ये

क्षुत्पिपासामलां ज्येष्ठा मलक्षीं नाशयाम्यहं
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥ 8 ॥

तस्मा”द्यज्ञात्स’र्वहुतः’ | संभृ’तं पृषदाज्यं |
पशूग्-स्ताग्-श्च’क्रे वायव्यान्’ | आरण्यान्-ग्राम्याश्च ये

गंदद्वारां दुरादर्षां नित्यपुष्टां करीषिणीं
ईश्वरीग्म् सर्व भूतानां तामिहोपह्वये श्रियं ॥ 9 ॥

तस्मा”द्यज्ञात्स’र्वहुतः’ | ऋचः सामा’नि जज्ञिरे |
छंदाग्’सि जज्ञिरे तस्मा”त् | यजुस्तस्मा’दजायत

मनस: कामकूतिं वाच: सत्यमशीमहि
पशूनां रूपमन्यस्य मयि श्री:श्रयतां यश: ॥ 10 ॥

तस्मादश्वा’ अजायंत | ये के चो’भयाद’तः |
गावो’ ह जज्ञिरे तस्मा”त् | तस्मा”ज्जाता अ’जावयः’

कर्दमेन प्रजाभूता मयि संभव कर्दम
श्रियं वासय मे कुले मातरं पद्ममालिनीं ॥ 11 ॥

यत्पुरु’षं व्य’दधुः | कतिथा व्य’कल्पयन् |
मुखं किम’स्य कौ बाहू | कावूरू पादा’वुच्येते

आप: सृजंतु स्निग्दानि चिक्लीत वसमे गृहे
नि च देवीं मातरं श्रियं वासयमे कुले ॥ 12 ॥

ब्राह्मणो”ऽस्य मुख’मासीत् | बाहू रा’जन्यः’ कृतः |
ऊरू तद’स्य यद्वैश्यः’ | पद्भ्याग्ं शूद्रो अ’जायतः

आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ 13 ॥

चंद्रमा मन’सो जातः | चक्षोः सूर्यो’ अजायत |
मुखादिंद्र’श्चाग्निश्च’ | प्राणाद्वायुर’जायत

आर्द्रां य: करिणीं यष्टिं सुवर्णां हेम मालिनीं
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ 14 ॥

नाभ्या’ आसीदंतरि’क्षं | शीर्ष्णो द्यौः सम’वर्तत |
पद्भ्यां भूमिर्दिशः श्रोत्रा”त् | तथा’ लोकाग्-म् अ’कल्पयन्

तां म आवह जातवेदो लक्ष्मीमन पगामिनीं
यस्यां हिरण्यं प्रभूतं गावो दास्यो श्वान्, विंदेयं पुरुषानहं ‖ 15 ‖
Source: Sri Naduri Srinivas (Youtube Channel)